श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे

# ॥ सङ्कीर्णस्तबकः त्रयोविंशः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

# ॥ सङ्कीर्णस्तबकः त्रयोविंशः ॥

समस्तगुणविस्तार समावेशनिवेशनम्।
वन्देऽरविन्दनिलयं वरदं परदैवतम्॥ **23.1** ॥

औदार्यशेवधिरनिन्दित कान्तिसिन्धुः
    ओजः प्रसादनिधिरुज्ज्वलसौकुमार्या।
वैदर्भरीतिरिव वारिधिराजकन्ये
    श्लाघापदं भवसि सारविदां कवीनाम्॥ **23.2** ॥

आरम्भमेत्य महनीय ममोघयत्ना
    प्राप्त्याशया श्रितपदा परमेप्सितस्य।
नित्यं फलं कलयसे नियताप्तिभाजा
    नाथेन नाटककलापरिपाटिकेव॥ **23.3** ॥

व्याप्त्या प्रसिद्धा श्रितपक्षपाता
    बाधानभिज्ञा प्रतिपक्षशून्या।
समीहितं साधयसि ध्रुवं नः
    सद्धेतुवद् दुग्धपयोधिकन्ये॥ **23.4** ॥

प्रकृतिरुचिरमूर्तिः प्रत्ययानां विधात्री
    समधिकगुणवृद्धिः साधुतामादधाना।
सृजति पदमजाद्यैरीप्सितां द्रागनन्त -
    स्थिरफणितिविधेया शब्दविद्येव पद्मे॥ **23.5** ॥

अधिकरण विचारारम्भसीदद्विपक्षं
    किमपि विशदयन्त्या कृत्स्नवेदार्थतत्त्वम्।
गलति गहनकर्मालम्बनं मोहजालं
    कमलमुखि भवत्या कर्ममीमांसयेव॥ **23.6**॥

चतुराकृतिलक्षणाभिरामा
    परदेवस्य गुणान् प्रकाशयन्ती।
उपदर्शयसेऽपवर्गमार्गं
    मम शारीरकभारतीव मातः॥ **23.7**॥

सुवर्णश्रीरम्यं शुभकरपदर्चं श्रुतिकुलं
    भवद्रूपं चेदं भवति महितं ब्राह्मणगणैः।
तयोरित्थं भेदः स्फुरति तटिनीजानितनये
    बुधेन्द्रैरध्येयं प्रथममितरद् ध्येयमिति च॥ **23.8**॥

व्याकोचवारिजधरां द्विजराजसेव्याम्
    अव्याहताममृतशैवलिनीमिव त्वाम्।
निःसीम संसृतिनिदाघ विदाहतप्ताः
    केचित् सुधाब्धितनये कृतिनो भजन्ते॥ **23.9**॥

वात्सल्यं तव राघवप्रणयिनि व्याचष्ट काकासुरः
    शक्तिं दुर्घटसाधनीं हनुमतः शीतस्स वालानलः।
औदार्यं त्वदपाङ्गलब्ध विभवोल्लासा महेन्द्रादयः
    कारुण्यं कृपणा वयं तु विगुणा निर्हेतुकं रक्षिताः॥ **23.10**॥

दोषौघः शरणं जगाम गुणतामादित्सुरङ्गानि ते
    कौटिल्यं किमपि भ्रुवौ कठिनता कल्याणि वक्षोरुहौ।
दारिद्र्यं बत मध्यभागमधरं रागस्तमः कुन्तलान्
    चापल्यं दृशमम्ब मन्दगतिता पादौ च मौग्ध्यं मुखम्॥ **23.11**॥

कृतस्त्वया देवि कृपाकटाक्ष -
    लेशैरहं श्लोककृदर्भकोऽपि।
परं त्वहं श्लोककृदित्यभीक्ष्णं
    कदा नु गायेयमिति प्रतीक्षे॥ **23.12** ॥

आगस्ततिं मे किमदृश्यविद्याम्
    अध्यापयस्यब्धिसुते तथा त्वम्।
स विश्वतश्चक्षुरधोक्षजोऽपि
    न पश्यति व्यक्ततमां यथैनाम्॥ **23.13** ॥

रक्षेति नाथसविधे तव गाढमुक्तिः
    यद्युद्गता मम भवेत्तत एव मुक्तिः।
एतावति श्रितमनोरथपूरणेऽस्मिन्
    कृष्णप्रिये ननु तथापि कियान् विचारः॥ **23.14** ॥

यद्युन्निनीषसि यदूद्वहवल्लभे मां
    कर्माणि कारय तदा कलुषोज्झितानि।
नैर्घृण्यमेषि यदि वा न ततोऽपि दूये
    नैराश्यमेव हि सुखं निगदन्ति सन्तः॥ **23.15** ॥

नैवापवर्गमति दुर्गममर्थयेऽहं
    न स्वर्गमम्ब न ततोऽप्यपरं च सौख्यम्।
अभ्यर्थये हरिसखि त्वयि भक्तिमात्रम्
    अत्रापि चिन्तयसि चेदथ किं करोमि॥ **23.16** ॥

मा कोपं कुरु मातरेकमधुना जल्पामि धृष्टो वचः
    शक्तिः कर्तुमकर्तुमन्यथयितुं जागर्ति येयं त्वयि।
तल्लेशो मम चेदसेत्स्यदमृतं सर्वाननेष्यं क्षणात्
    विद्मो नैवमुपेक्षसे घनकृपा कस्मात्त्वमस्मानिति॥ **23.17** ॥

सौन्दर्यस्य निधिर्मुदामुदयभूः संपत्तिमञ्जूषिका
    कान्तीनां निलयः कलाजलनिधिः क्षान्तेर्निशान्तस्थली।
दाक्षिण्यस्य शरण्यसद्म कमले दातृत्वविश्रान्तिभूः
    आस्थानी यशसां प्रपाऽसि सतृषामाद्यस्य पुंसो धनम्॥ **23.18** ॥

मोहोन्मूलनमूलिका भवजुषां मोक्षाध्व निश्रेणिका
    चेतः शुद्धिविधानसिद्धगुलिका चिन्तातमश्चन्द्रिका।
विद्याविभ्रमशालिकाऽसि कमले विष्णोरुरोमालिका
    मातस्त्वं मम पारिजातलतिका मोदाम्बुधेर्वीचिका॥ **23.19** ॥

विकासः पुण्यानामपि च विकचाम्भोरुहरुचां
    विवर्तो हर्षाणां विततिरमृतानां परिणतिः।
विकारः कारुण्यामृत जलधिवीची परिषदां
    विकल्पः कल्पद्रोर्जननि तव वीक्षा विजयते॥ **23.20** ॥

प्रज्ञालतानां किमुपघ्नयष्टिः
    पनायतां कामगवी कवीनाम्।
प्रपञ्चमातस्त्वमकिञ्चनानां
    प्राणप्रतिष्ठा परमाऽसि काष्ठा॥ **23.21** ॥

अस्मादृशामभ्युदयाङ्कुरो वा
    नाथस्य पद्मे नयनोत्सवो वा।
दिव्यौषधं वा दुरितामयानां
    पारं परं वा भवती भवाब्धेः॥ **23.22** ॥

ताटङ्करक्षां त्रिदशाङ्गनानां
    तरङ्गिणीजानितपः फलं श्रीः।
दारिद्र्यविद्रावणमूलविद्यां
    जगुर्जगन्नायकनायिकां त्वाम्॥ **23.23** ॥

परिष्कृतिं पङ्कजकाननानां
 परायणं नः शरणागतानाम्।
सन्तः शकुन्तध्वजसुन्दरि त्वां
 सर्वस्वमाहुः सकलागमानाम्॥ **23.24** ॥

परिकर्म विनिर्मलं मुरारेः
 प्रतियत्नं प्रतिबुद्धशेमुषीणाम्।
भवतीं भवतीक्ष्णयातनानां
 अभिचाराहुतिमाहुरब्धिकन्ये॥ **23.25** ॥

मुनिमानस राजहंसिका वा
 मुरभित्कल्पक मञ्जुमञ्जरी वा।
श्रुतिपञ्जरदिव्यशारिका वा
 जननि त्वं गुणरत्नपेटिका वा॥ **23.26** ॥

प्रतिसृष्टिरियं तडिल्लतानां
 परिणामो नु शिरीषमञ्जरीणाम्।
प्रतिभाति हृदि त्वदीयमूर्तिः
 परिवृत्तिर्हरिपत्नि काञ्चनानाम्॥ **23.27** ॥

प्रस्तावना भुवनपालन नाटकस्य
 प्राच्या दिशो धवलिमा भवकालरात्रेः।
दुर्गर्व सर्वरजनीचर धूमकेतुः
 दोषद्रुमस्य परशुस्तव देवि रूपम्॥ **23.28** ॥

आलानयष्टिरसि योगिमनोगजानाम्
 आशापिशाच परिमोचन यन्त्रविद्या।
कार्तान्तलोक गमन प्रतिरोधमुद्रा
 कारुण्यपुण्यतटिनी कमलालये त्वम्॥ **23.29** ॥

शरदं तमोघनानां
    शाश्वतसुखसम्पदामुपोद्घातम्।
शरणं व्रजामि कमले
    शौरिवशीकार मूलिकां भवतीम्॥ **23.30**॥

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे सङ्कीर्णस्तबकः त्रयोविंशः॥